# Tripurasundari Pushpanjali StavaH

# ત્રિપુરસુન્દરીપુષ્પાઞ્જલિસ્તવઃ

## Document Information

Text title : tripurasundarIpuShpAnjalistavaH

File name : tripurasundarIpuShpAnjalistavaH.itx

Category : devii, dashamahAvidyA, devI, panchadashI, stava

Location : doc_devii

Proofread by : Pallasena Narayanaswami ppnswami at gmail.com

Latest update : December 27, 2022

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 26, 2025

*sanskritdocuments.org*

# Tripurasundari Pushpanjali StavaH

# ત્રિપુરસુન્દરીપુષ્પાઞ્જલિસ્તવઃ

શ્રીગણેશાય નમઃ ।

કલ્યાણદાત્રિ કમનીયતનૂલતે ત્વાં
    કં ચાપિ કાલમનુચિન્ત્ય હૃદાબ્જમધ્યે ।
કામં પ્રહર્ષભરિતેન મયા તવાદ્ય
    પુષ્પાઞ્જલિશ્ચરણયોરયમમ્બ કીર્ણઃ ॥ ૧॥

એતન્મદીયસુકૃત્તં પરમં પુરાણં
    યત્ત્વામહં પ્રતિદિનં મનસા ભજામિ ।
સાક્ષાત્કૃતેન તવ રૂપમનેન ચાદ્ય
    પુષ્પાઞ્જલિશ્ચરણયોરયમમ્બ કીર્ણઃ ॥ ૨॥

ઈશાદિદેવમહનીયમહાનુભાવે
    દીનં ત્વિમં ભવભયેન પરિસ્ફુરન્તમ્ ।
દીનાર્તિહર્ત્રિ દયયા પરિપાલયાશુ
    પુષ્પાઞ્જલિશ્ચરણયોરયમમ્બ કીર્ણઃ ॥ ૩॥

લજ્જાં વિહાય બહુધા બહવોઽપિ દેવાઃ
    સમ્પૂજિતા જડધિયા નતુ કોઽપિ દૃષ્ટઃ ।
લબ્ધં તવૈવ રમણીયવપુર્દૃશા મે
    પુષ્પાઞ્જલિશ્ચરણયોરયમમ્બ કીર્ણઃ ॥ ૪॥

હ્રીંકારમન્ત્રનિલયે બહુશો ભવાબ્ધૌ
    મગ્નઃ પરં તુ ન કદાપિ ગતોઽસ્મિ પારમ્ ।
તત્તારણે નિપુણયોસ્ત્રિપુરે મયાદ્ય
    પુષ્પાઞ્જલિશ્ચરણયોરયમમ્બ કીર્ણઃ ॥ ૫॥

હસ્તેષુ પાશમહનીયસિતેક્ષુચાપે
    પુષ્પાસ્ત્રમઙ્કુશવરં લલિતં દધાને ।

હેમાદ્રિતુઙ્ગતરશૃઙ્ગનિવાસશીલે
    પુષ્પાઞ્જલિશ્ચરણયોરયમમ્બ કીર્ણઃ ॥ ૬॥

સર્વેષુ દેવિ સમયેષુ ગતિસ્ત્વમેવ
    નાન્યં કદાપિ મનસા સમનુસ્મરામિ ।
સર્વત્ર રૂપમતુલં તવ પશ્યતાદ્ય
    પુષ્પાઞ્જલિશ્ચરણયોરયમમ્બ કીર્ણઃ ॥ ૭॥

કસ્તે પુરેશિ વિધિવત્તુ સમર્હણાયાં
    શક્તઃ સમસ્તપરિવર્હયુતોઽપિ ધીમાન્ ।
હૃત્પઙ્કજેન ભવતીં ભજતા મયાદ્ય
    પુષ્પાઞ્જલિશ્ચરણયોરયમમ્બ કીર્ણઃ ॥ ૮॥

હન્તાતિસ્થભવપાવકશોષિતેન
    કુત્રાપ્યલબ્ધશરણેન સરોજવક્ત્રે ।
અન્તે મયાત્રભવતીં શરણં ગતેન
    પુષ્પાઞ્જલિશ્ચરણયોરયમમ્બ કીર્ણઃ ॥ ૯॥

લક્ષ્યાસિ દેવિ બહુજન્મતપોબલેન
    લક્ષ્મીશધાતૃપરિપૂજ્યપદાસ્તુજાતે ।
આલક્ષ્ય રૂપમરુણં તવ વિસ્મિતેન
    પુષ્પાઞ્જલિશ્ચરણયોરયમમ્બ કીર્ણઃ ॥ ૧૦॥

હ્રીઙ્કારમેવ શરણં જગતાં વદન્તિ
    હ્રીઙ્કારમેવ પરમં ભુવને રહસ્યમ્ ।
હ્રીઙ્કારમેવ સતતં સ્મરતા મયાદ્ય
    પુષ્પાઞ્જલિશ્ચરણયોરયમમ્બ કીર્ણઃ ॥ ૧૧॥

સર્વસ્ય દેવિ ભુવનસ્ય નિદાનભૂતા
    ત્વય્યેવ સર્વમનઘે વિલયં ગતં સ્યાત્ ।
સઞ્ચિન્ત્ય ચૈતદધુના ત્રિપુરે મયા તે
    પુષ્પાઞ્જલિશ્ચરણયોરમમ્બ કીર્ણઃ ॥ ૧૨॥

કશ્ચિદ્યદા ભવનિહન્ત્રિ વિચિન્તયેત્ત્વાં
    દીનં તદૈવ હિ કટાક્ષયસે દૃશા ત્વમ્ ।
એવં વિચિન્ત્ય ભવતીં સ્મરતા મયાદ્ય
    યુષ્પાઞ્જલિશ્ચરણયોરમમ્બ કીર્ણઃ ॥ ૧૩॥

લબ્ધ્વા ત્વદીયચરણામ્બુજમમ્બ
　　જન્તુર્નાવર્તતે પુનરપિ પ્રભવાય લોકે ।
વેદોક્તિમેવમસકૃત્સ્મરતા મયાદ્ય
　　પુષ્પાલિશ્ચરણયોરયમમ્બ કીર્ણઃ ॥ ૧૪॥

હ્રીઙ્કારમેવ જપતાં પ્રતિવાસરં ચ
　　હ્રીઙ્કારમેવ ભજતાં સકલેષ્ટસિદ્ધ્યૈ ।
હ્રીઙ્કારમેવ પરમં શરણં ગતેન
　　પુષ્પાઞ્જલિશ્ચરણયોરયમપ્ય કીર્ણઃ ॥ ૧૫॥

શ્રીઙ્કારમન્ત્રકનકાબ્જનિવાસશીલે
　　શ્રીરૂપધારિણિ શિવો શ્રિતકલ્પવલ્લિ ।
શ્રીમદ્ગુહસ્તુતમહાવિભવે પુરેશિ
　　પુષ્પાઞ્જલિશ્ચરણયોરયમમ્બ કીર્ણઃ ॥ ૧૬॥

ઇતિ શ્રીત્રિપુરસુન્દરીપુષ્પાઞ્જલિસ્તવઃ સમ્પૂર્ણઃ ॥

Proofread by Pallasena Narayanaswami ppnswami at gmail.com

*Tripurasundari Pushpanjali StavaH*

pdf was typeset on February 26, 2025

Please send corrections to *sanskrit@cheerful.com*